# संस्कृतवार्ता:

**दिनाङ्क: - 08.11.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- महाराष्ट्र-झारखण्डयो: सम्भावित-विधानसभानिर्वाचनयो: प्रसङ्गे राजनीतिकदलै: प्रचाराभियानानि तीव्रतया विधीयन्ते। प्रधानमन्त्री भाजपेति दलस्य च वरिष्ठ: नेता श्रीनरेन्द्रमोदी धुले-नाशिकयो: नैर्वाचनिक-सभे सम्बोधितवान्।
- राष्ट्रपति-पदासीनया द्रौपदी-मुर्मु वर्यया उक्तं यत् भ्रष्टाचार: एक: रोग: अस्ति, अयञ्च समूलतया नाशयितव्य: इति।
- विदेशमन्त्री डॉ. जयशंकर: भारत-आसियानयोर्मध्ये सहयोगाात्मक-रणनीते: महत्वं प्रतिपादयन् सबलं उक्तवान् यत् अनयो: देशयो: संयोगात्मिका युति: समकालीनानां संकटानां निरशने महत्वपूर्णा भूमिकां निर्वोढुं शक्नोतीति।
- अद्य सर्वोच्च-न्यायालयेन अलीगढ़-मुस्लिम-विश्वविद्यालयाय अल्पसंख्यक-विश्वविद्यालय: अस्ति इति विषये सप्तषष्ठ्यधिक-नवदश-शततम-वर्षस्य निर्णय: निरस्ती कृत:।

**अथ वार्ता: विस्तरेण**

**प्रचाराभियानम्**

महाराष्ट्र-झारखण्डयो: सम्भावित: विधानसभानिर्वाचनयो: प्रसङ्गे राजनीतिकदलै: प्रचाराभियानानि तीव्रतया विधीयन्ते। विभिन्नानां राजनीतिक दलानां प्रमुखनेतार: एकस्थानान्तरम् द्वितीयेति रीत्या जनसभा: पथप्रदर्शनादीनि च समाचरन्त: सन्ति। येन मतदातार: तेषां पक्षे भवेयुरिति ते अपेक्षन्ते। प्रधानमन्त्री भाजपेति दलस्य च वरिष्ठ: नेता श्रीनरेन्द्रमोदी धुले इति क्षेत्रे एकां नैर्वाचनिक-सभां सम्बोधितवान्। तेनोक्तं यत् भारतस्य विकासाय महिलानां विकास: महत्वपूर्ण: अस्ति। प्रधानमन्त्रिणा प्रोक्तं यत् तस्य सर्वकार: महिलानां कल्याणाय प्रतिबद्धोऽस्ति। तेनोक्तं यत् महाराष्ट्रे विकासस्य या गति: विगत सार्धद्वयवर्षेभ्य: प्रवर्धिताऽस्ति। तस्या: सातत्यं नितरां भवेदिति। तेनोक्तं यत् तस्य प्रशासनं आगामिषु पञ्चवर्षेषु महाराष्ट्रराज्यं विकासस्य नूतनां उन्नतिं प्रति नेष्यतीति।

तेन सबलं प्रतिपादितं यत् केवलं महायुति प्रशासनमेव राज्याय आवश्यकं सुशासनदाने समर्थमस्तीति। अपराह्णे मोदिना नाशिक क्षेत्रे एका जनसभा सम्बोधिता। महाराष्ट्रस्य शिराला क्षेत्रं गृहमन्त्रिणा अमितशाहेन अद्य एका जनसभा सम्बोधिता। एतन्मध्ये एनसीपी (एसपी) इति दलस्य प्रमुखेण श्रीशरदपवारेण महाविकास-अघाड़ीति दलसंयुक्ते: प्रत्याशिन: पक्षे वर्धायां प्रचाराभियानं प्रचालितम्। तस्यैव दलस्य नेत्री सुप्रिया-सुले इत्यनयापि दलस्य प्रत्याशिन: पक्षे पुणे-नगरे प्रचाराभियानम् कृतम्। ज्ञातव्यमस्ति यत् अष्टाशीत्यधिक-द्विशतविधान-सभाभ्य: मतदानम् अस्यैव मासस्य विंशे दिनांके भविता। कांग्रेसदलनेत्रा राहुलगान्धिना अपि झारखण्डस्य सिमड़ेगा इति क्षेत्रे आई.एन.डी.आई.ए. इत्याख्यस्य नैकदलयुते: प्रत्याशिन: पक्षे प्रचाराभियानम् प्रचालितम्। अस्मिनुपक्रमे श्रीमता गान्धिना निगिदतं यत् निर्वाचनमिदं तयो: द्वयो दलसमूहयोर्मध्ये आस्त, यत्र एकत्र अस्मादृशा: संविधानरक्षका: सन्ति। तत्रैव अपरत्रच संविधानस्य समापयितार: इति।

प्रचाराभियानं तत्रापि रूचिकरं जायते यत्र मध्यावधित्वेन विभिन्नेषु प्रान्तेषु अष्टचत्वारिंशत् विधानसभाभिस्सह वायनाड-नांदेडयो: लोकसभानिर्वाचनमपि भवितव्यमस्ति।

**विराम:**

**संस्कृतवार्ताया: संस्करणमिदम् इदानीम् आकाशवाणीत: प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्या: अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**राष्ट्रपति:**

राष्ट्रपति-पदासीनया द्रौपदी-मुर्मु-वर्यया अद्य विश्वासो व्यक्तीकृत: यत् प्रशासनस्य 'कथमपि भ्रष्टाचारो न सोढव्य:' इति नीति: भ्रष्टाचारं समूलं नाशयिष्यति। तया प्रोक्तं यत् भारतीय-समाजे सत्यनिष्ठा अनुशासनञ्च जीवनस्य आदर्शौ मन्येते। राष्ट्रपति: नवदिल्ल्यां केन्द्रीय-सतर्कता-आयोगस्य सतर्कता-जागरूकता सप्ताहावसरे एकस्मिन् कार्यक्रमे सम्बोधयन्ती आसीत्। तयोक्तं यत् भ्रष्टाचार: एक: रोग: अस्ति, अयञ्च समूलतया नाशयितव्य: इति। अवसरेऽस्मिन् तया अभियानस्यास्य प्रशंसा कृता-

राष्ट्रपतिना प्रोक्तं यत् विश्वास: सामाजिक-जीवनस्य आधारो वर्तते, भ्रष्टाचारश्च न केवलं आर्थिकप्रगतौ बाधको भवति, परं समाजे विश्वासमपि न्यूनीकरोति।

**जयशंकर:**

विदेशमन्त्री डॉ. जयशंकर: आसियानयोर्मध्ये सहयोगाात्मक-रणनीते: महत्वं प्रतिपादयन् सबलं उक्तवान् यत् उभयो: देशयो: जनसांख्यिकी, वरीवर्धमानाश्च अपेक्षा: अन्योन्याश्रितौ स्त:, एतौ च अर्थव्यवस्थाया: वाहकावपि भवितुं शक्नुत:। डॉ. जयशंकर: अद्य सिंगापुरे **आसियान-भारत-नेटवर्क-ऑफ-थिंक-टैंक** इत्याख्यं चक्रमञ्चीय-सम्मेलनं सम्बोधयन् आसीत्। तेनोक्तं यत् अनयो: देशयो: संयोगात्मिका युति: समकालीनानां संकटानां निरशने महत्वपूर्णां भूमिकां निर्वोढुं शक्नोति।

**अलीगढ़-मुस्लिम-विश्वविद्यालय**

अद्य सर्वोच्च-न्यायालयस्य सप्त न्यायाधीशानां पीठेन त्रयाणां मतानां प्रत्युत्तरे चतुर्भि: मतै: एस. अजीज-बाशा इत्यमुं विरुध्य भारत-सर्वकारस्य प्रकरणे सप्तषष्ठ्यधिक-नवदश-शततम-वर्षस्य निर्णय: निरस्ती कृत:। यो हि अलीगढ़-मुस्लिम-विश्वविद्यालयाय अल्पसंख्यक-विश्वविद्यालय अस्ति इति निर्णयस्य आधार: आसीत्। तस्मिन् निर्णये उक्तमासीत् यत् विधिना स्थापिता काऽपि संस्था अल्पसंख्यक संस्थानत्वेन स्थापनाय अधिकारं दर्शयितुं न शक्नोति-इति।

सर्वोच्च-न्यायालयेन प्रोक्तं यत् कस्या: अपि संस्थाया: अल्पसंख्यक-संस्थाया: स्थानं तदर्थं निरस्तं कर्तुं न शक्यते, यतोहि तस्या स्थापना वैधानिक-व्यवस्थया कृता आसीत् इति। पीठेन बहुमता स्वीकृतं यत् न्यायालयेन एतत् अन्वेक्षणं कर्तव्यं यत् विश्वविद्यालयस्य स्थापना केन कृत: किमर्थञ्च कृतमिति।

**क्रिकेट**

क्रिकेट-क्रीडाया: विंशतिं प्रति विंशति: वर्गे अद्य सध्यायां भारतदक्षिणाफ्रीकयोर्मध्ये चतुर्णां क्रीडानां शृंखलाया: प्रथमा क्रीडा डरबन-नगरस्य किंग्स्मीड इति क्षेत्रे क्रीडिष्यते। भारतीयदलस्य नायकत्वं सूर्यकुमारयादवेन क्रियते। एडम-मारक्रम इत्यनेन च दक्षिण-अफ्रीकादेशस्य क्रिकेटदलस्य नेतृत्वं क्रियते। दलश्रेण्यां यत्र भारतं प्रथमं स्थानं धत्ते तत्रैव दक्षिण-अफ्रीकादेश: षष्ठतमम्।

**बैडमिंटन**

कोरिया-बैडमिन्टन-मास्टर्स प्रतिस्पर्धायां एकल-पुरुष वर्गे उपान्त्य-चक्रे भारतस्य किरण-जॉर्ज इत्यनेन स्वीय स्थानं सुनिश्चितम्। प्रागुपान्त्य-चक्रे अद्य प्रात: स: जापान-देशस्य ताकुमा-ओबायाशी इत्यमुं पराजितवान्।

**।।इति वार्ता:।।**